दिनान्ते त्रिधा विभक्तदिनतृतीयभागे दिवोत्थान-
मित्यनुरोधात्। अतएव।

"रात्रौ विबोधो विनिहन्ति पौरान्
स्वापो दिवा राष्ट्रकुलं नृभर्त्तुः।
सन्ध्याद्वये स्वल्पफला धरित्री
भवेन्नराणामपि रोगदुःखम्॥"

इति श्रुतिः॥ वराहपुराणे।
"द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे।
आ-भा-का-सितपक्षेषु शयनावर्त्तनादिकम्॥"
तदेवं शयनादौ कालचतुष्टयम्। द्वादश्यां
निशादौ नक्षत्रयोगः। तदभावेऽपि निशान्त्य-
नाद्रेण तिथ्यन्तरे पादयोगः। तस्याप्यभावे-
ऽपि सन्ध्यायां नक्षत्रमात्रयोगः। तस्याप्यभावे
द्वादश्यां सन्ध्यायामिति। विष्णुधर्म्मोत्तरे।
"किं तस्यैवाद्यपादेन दशम्यंशेन यो दिवा।
पौष्णांशेन किं तेन प्रतिपद्यध यो निशि॥"
इति दशमीप्रतिपदोर्निषेधात् एकादश्यादिपौर्ण-
मास्यन्तानां तिथीनामभ्यनुज्ञानम्॥ * ॥
पद्मपुराणे सर्व्वदेवशयनादिकमुक्तं यथा,—
"प्रतिपद्धनदस्योक्ता पवित्रारोहणे तिथिः।
श्रिया देया द्वितीया तु तिथीनामुत्तमा स्मृता॥
तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी स्मृता।
मातॄणां नवमी प्रोक्ता दशमी वासुकेस्तथा॥
एकादशी ऋषीणान्तु द्वादशी चक्रपाणिनः।"
चक्रपाणिन इति पदव्यवहार इत्यस्मात्।
"त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्द्दशी।
मम चैव मुनिश्रेष्ठ पौर्णमासी तिथिः स्मृता॥
यस्य यस्य तु देवस्य यन्नक्षत्रं तिथिश्च या।
तस्य देवस्य तस्मिंश्च शयनावर्त्तनादिकम्॥"
अत्र हरिशयनाद्याषाढ़ादिविधानात् तत्साह-
चर्य्यादन्येषामपि तथा। ज्योतिषेऽपि।

"व्रजति यदा मिथुनं विहाय
कर्कं राजविवर्ज्जितां तिथिं सूर्य्यः।
भवति तदा नियतं हिराषाढ़ः
सुरशयनादिविधिर्द्वितीये मासि॥"

राज्ञा चन्द्रेण विवर्ज्जितां अमावास्याम्। पूर्व्व-
कृष्णपक्षे मिथुने संक्रान्ते इति शेषः। हरि-
नाथोपाध्यायास्तु। यमः।
"क्षीराब्धौ शेषपर्य्यङ्के आषाढ्यां संविशेद्धरिः।
निद्रां त्यजति कार्त्तिक्यां तयोस्तं पूजयेत् सदा॥
ब्रह्महत्यासमं पापं क्षिप्रमेव व्यपोहति।
हिंसात्मकैश्च किं तस्य यज्ञैः कार्य्यं महात्मनः।
प्रस्वापे च प्रबोधे च पूजितो येन केशवः॥"
आषाढ़शुक्लैकादशीमारभ्य पौर्णमासीपर्य्यन्तं
विष्णोर्निद्राग्रहणरूपशयनसमयः। अतएव
एकादश्यां शयनमभिधाय तदादिदिनपञ्चके
कर्म्मकथनं ब्रह्मपुराणे। वराहपुराणीये तु।
एकादशीकालीनमन्त्रे निद्राग्रहणाभिधानम्।
यमस्मृतौ पौर्णमास्यां शयनाभिधानम्।
आषाढ़ीपदस्यानुपाधिस्तत्रैव प्रवृत्तिः। एवञ्च
ब्रह्मपुराणे यद्यप्येकादश्यां प्रबोधसमयः। तेन
वराहपुराणे द्वादश्यां प्रबोधाभिधानम्। यम-
स्मृतौ कार्त्तिक्यां प्रबोधाभिधानम् सर्व्वसमञ्जस-
मिति। एवमेव श्रीदत्तोपाध्यायाः। कल्पतरुस्तु
एकादश्यामेव शयनं प्रबोधश्च। यमस्मृतावा-
षाढ़ी कार्त्तिक्येयमिति व्युत्पत्त्या न तत्प्रत्य-
यानुपपत्तिः। अपवादविषयके क्वचिदुत्सर्ग-
प्रवृत्तेरित्याह। श्रीभगवद्वाक्यम्।
"मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने।
फलमूलजलाहारी हृदि शल्यं ममार्पयेत्॥"
फलाहारपदमनशनपरम्। तेन सर्व्वथा अन-
शनपरत्वम्। इत्येकादशीतत्त्वम्॥ * ॥
मर्त्त्यानां शयनविधिनिषेधौ यथा,—
सूत उवाच।
"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च।
भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत्॥
शुचिं देशं विविक्तन्तु गोमयेन तु लेपयेत्।
प्रागुदक्प्रवणे चैव संस्वपेत सदा बुधः॥
प्राक्शिराश्च स्वपेन्नित्यं तथा वै दक्षिणाशिराः।
स्वपेदुदक्शिरा नैव तथा प्रत्यक्शिरा न च।
न चान्तर्द्धानहीने तु न तिर्य्यक् च कदाचन॥
शून्यालये श्मशाने तु एकवृक्षे चतुष्पथे।
महादेवगृहे चापि मातृवेश्मनि न स्वपेत्॥
न यक्षनागायतने स्कन्दस्यायतने तथा।
गर्भेषु च विना दीक्षां न स्वपेच्च कथञ्चन॥
धान्यगेहे च विप्राणां गुरूणाञ्च तथोपरि।
नाशुचौ पर्णकीर्णे तु नाशुचिर्नाशिखस्तथा॥
दिने सन्धौ न नग्नश्च नोत्तरापरमस्तकः।
आकाशे पर्व्वते शून्ये न च चैत्यद्रुमे तथा॥
न तु दारेऽम्भसाकीर्णे नार्द्रपादस्त्वधावितः।
पालाशे शयने नैव बहुदारकृते न च॥
न दग्धे विद्युता चैव वह्निस्पृष्टे जले तथा।
न स्वपेत् सन्ध्ययोर्नित्यं न शिरस्यासने कटे॥
एवं स्वपन् नरो नित्यं सुखस्येह परत्रभाक्।
व्यत्यये च भवेद्दुःखी ततो नरकमश्नुते॥"
इति वह्निपुराणे आह्निकतपोनामाध्यायः॥ * ॥
अपि च। सति सूर्य्ये शय्या च न पातनीया
सूर्य्योदयात् पूर्व्वमुत्तोलनीया। तथा च स्मृतिः।
"भास्करादर्शशय्यानि नित्याग्निसलिलानि च।
सूर्य्यावलोककिदीपानि लक्ष्म्या वेश्मानि भाज-
नम्॥
आसनं वसनं शय्या जायापत्यं कमण्डलुः।
आत्मनः शुचिरेतानि न परेषां कदाचन॥"
न कदाचन इत्यनुमतिं विना अन्यथातिथ्यानु-
पपत्तेः। व्यासः।
"शुचौ देशे विविक्ते तु गोमयेनोपलिप्तके।
प्रागुदक्प्लवने चैव संविशेत्तु सदा बुधः॥
माङ्गल्यं पूर्णकुम्भञ्च शिरःस्थाने निधापयेत्।
वैदिकैर्गारुड़ैर्मन्त्रै रक्षां कृत्वा स्वपेत्ततः॥"
गर्गः।
"स्वगृहे प्राक्शिराः शेते आयुष्ये दक्षिणा-
शिराः।
प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः॥"
मार्कण्डेयपुराणे।
"प्राक्शिराः शयने विद्यात् धनमायुश्च दक्षिणे।
पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे॥"
तथा।
"नमस्कृत्याव्ययं विष्णुं समाधिस्थः स्वपेन्निशि।"
मार्कण्डेयः।
"शून्यागारे श्मशाने च एकवृक्षे चतुष्पथे।
महादेवगृहे चापि शर्करालोष्टपांशुषु॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि।
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा॥"
न स्वपेदित्यर्थः। इत्याह्निकाचारतत्त्वम्॥ * ॥
अन्यच्च।
"भुक्त्वा च विधिवन्मन्त्रैर्द्विजो भुक्तावशिष्टकम्।
ससुहृद्बान्धवजनः स्वपेत् शुष्कपदो निशि॥
नोत्तराभिमुखः स्वप्यात् पश्चिमाभिमुखो न
च।
न चाकाशे न नग्नो वा नाशुचिर्नासने क्वचित्॥
न शीर्णायान्तु खट्वायां शून्यागारे न चैव हि।
नापि वंशे च पालाशे शयने वा कदाचन॥"
इति कौर्म्मे उपविभागे १८ अध्यायः॥ * ॥
अपि च।
"कृतपादादिशौचश्च भुक्त्वा सायं ततो गृही।
गच्छेत् शय्यां समन्ताच्च अथवा दारुनिर्म्मिताम्॥
शाल्मलस्य कदम्बस्य नीपमन्दारकस्य च।
किंशुकस्य वटस्याथ तथा कुशमयस्य च॥
आरोहणात भवेत् पापं तस्मात्तेषु न च
स्वपेत्।
प्ररोहशय्यां सूत्रे वा अपर्णे परमेश्वरि!॥
न शुक्रे नापवित्रे च न तृणे न च भूतले।
तूलिकायां तथा वस्त्रे शय्याभावे स्वपेद्गृही।
स्वपेन्न पट्टवस्त्रे च कलङ्की कम्बलेषु च॥"
इति मत्स्यसूक्ते ४४ पटलः॥ * ॥
अपि च।
"सूर्य्येणाभ्युदितो यस्तु त्यक्तः सूर्य्येण यः स्वपन्।
अन्यत्रातुरभावाच्च प्रायश्चित्तीयते नरः॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः॥
यस्मिन् सुप्ते सूर्य्य उदेति स सूर्य्येणाभ्युदितः।
यस्मिन् सुप्ते अस्तं याति स सूर्य्येण त्यक्तः॥
सूर्य्योदयास्तसमययोः स्वपन् प्रायश्चित्तीयते
पातकी भवेदित्यर्थः। इति तस्य टीका च॥
किञ्च।
"श्वासानष्टौ समुत्तानस्तान् द्वि १६ पार्श्वे च
दक्षिणे।
ततस्तद्द्विगुणान् ३२ वामे पश्चात् स्वप्यात्
यथासुखम्॥
वामदिशायामनलो नाभेरूर्द्ध्वेऽस्ति जन्तू-
नाम्।
तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम्॥"
इति भावप्रकाशः॥